ॐनमोभगवतेवासुदेवाय ॥ श्रीमत्पितृपदांभोजंनत्वासर्वार्थसिद्धिदं ।आचार्यदर्शितंमार्गं
त्रयंव्याख्यातुमुद्यत ॥१॥ हरिवागीशवागर्थोनस्वतोबुद्धिगोचरः ।तत्कृपैवतदीयंमांस्वार्थं
बोधयिष्यति ॥२॥ इतिनिश्चित्यमनसिसर्वशक्तितत्कृपाबलं ।विवृतिःकर्तुमारब्धातत्पदाब्जप्र
सादतः ॥३॥ यद्यपिपुष्टिप्रवाहमर्यादामार्गाः गीताश्रीभागवतादावुक्ताएवतथापीयदव
धिविविच्य केनापिनप्रकटीकृताइतिश्रीमदाचार्याःप्रमाणपूर्वकंविविच्यप्रकटीकर्तुं
प्रतिजानते ।पुष्टिप्रवाहमर्यादाइति ।मार्गाइतिशेषः ।विशेषेणेतितत्रविशेषामार्गत्रयेपृ
पिप्रत्येकंपुष्टिप्रवाहमर्यादाभेदवृत्ताविशेषाः ।तेसांकर्याभावायपृथक्निरूप्यंते ।तत्रपूर्वं
मार्गत्रयविभेदत्ताएकात्विशेषानाहुः ।जीवदेहक्रियाभेदैःप्रवाहेणफलेनवेति ।पुष्टि

दा२ ×पृथक्२ २२

४दृ२ ४प्रवाहेन२

मार्गीयाजीवाः वक्ष्यमाणमार्गद्वयजीवेभ्योभिन्नाः ।तेषांदेहाःपुष्टिमार्गानुकूलाभिन्नाएव ॥
तन्मार्गीयदेहसंबंधिक्रियाअपिभिन्नाः ।निरंतरंतदनुसारिक्रियाप्रवहणांप्रवर्त्तनंप्रवाहस्ते
नापिभेदः ।फलेनच ।वक्ष्यमाणमार्गद्वयफलातिरिक्तफलेनापिभेदः ।एवंप्रवाहमर्या
दयोरपिवक्ष्यमाणसाधनैरपिभेदः ॥२॥ एवंप्रकारभेदैर्वक्ष्यामीतिकथनं प्रतिज्ञायप्र
तिज्ञायाःप्रयोजनमाहुः ।सर्वसंदेहानभविष्यंतियच्छ्रुतेरिति ।सर्वेषांमार्गत्रयाणांसं
देहाःसंशयाःयस्यप्रकारभेदस्यश्रुतेःश्रवणात्कदापिकस्यापिनभविष्यंति ।एव
मुद्देशेनमार्गत्रयभेदमुक्त्वालक्षणान्याहुः ।तत्रप्रथमंपुष्टिमार्गसद्भावेप्रमाणमाहुः ॥
भक्तिमार्गस्येति ।यद्यपिभक्तिमार्गमर्यादादिभेदेनबहवएव श्रीभागवतादावुक्ताः

संति । तथाच कपिलदेवेनुक्तं । भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते । इत्यादि । तथा वै
कादशेपि योगेश्वरैर्भक्तिभेदकथने भक्तिभेदा उक्ता एव । तथापि शुद्धपुष्टिमार्गीयाचार्य्यैः
भक्तिमार्गस्य कथनात् पुष्टिरस्तीति निश्चय इति यदुक्तं तस्यायमाशयः । तत्र कपिलयो
गेश्वराद्युक्तप्रकारेषु शुद्धपुष्टिलक्षणाभावात् । न शुद्धपुष्टिभक्तित्वं । अतएव शुद्धपुष्टिल
क्षणमाहुः । माहात्म्यज्ञानपूर्वस्तु सुदृढः । सर्वतोधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मु राम
२ क्तिर्नचान्यथेति नारदपंचरात्रकथनात् । यद्यपि स्नेहो भक्तिरित्येतावदेव मुख्यं भ
क्तिलक्षणं तथापि माहात्म्यज्ञानपूर्वस्त्विति विशेषणकथनस्यायमभिप्रायः । प्रथ २
ममेवाचार्य्यप्रकटितभक्तिमार्गप्रवृत्तस्य यावत्सुदृढः सर्वतोधिकः स्नेहो भवति

तावत्सेवादिकरणे अपराधाभावार्थं माहात्म्यज्ञानवतां श्रीदेवकीमातृचरणानामपि
शुद्धपुष्टिमार्गस्नेहोत्पत्त्यनंतरं माहात्म्यज्ञानतिरोभावात् सनु द्विजे भवद्भीतोः कंसादह
मधीरधीरिति वचनं । अन्यच्च तत्रैव व्रजवासिनां सुदृढस्नेहवतां अवस्थासाधनविशुद्ध
सर्वाशयाक्य श्रीगोवर्द्धनोद्धरणं तेन वक्षुपिपासाद्यसह्यशारीरधर्मनिवृत्तिपूर्वकं स
परिकरसर्वव्रजरक्षाकरणं आत्मयोगानुभावेन श्रीगोवर्द्धनो
परिस्थितपक्षिपश्वादिरक्षाकरणाद्यत्यद्भुतानि दुर्व
नीयमाहात्म्यं दृष्ट्वापि दृष्टिनिवृत्त्यनंतरं श्रीगोवर्द्धनछायातः सर्वानेव हिरानी
य श्रीगोवर्द्धनं यथास्थानं स्थापयिता
माहात्म्यज्ञानस्योपयोगः । सुदृढस्नेहोत्पत्त्यनन्तरं तस्य स्वतएव निवृत्तिः । अतएव पूर्ण ॥८॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

[illegible] दृष्टमाहात्म्यस्मरणासीभावनाराहित्येनैवज
[illegible] बहिरागमनानन्तरं ते भगवति तिलकं वि[illegible]धायतदु
परि अक्षतान्स्थापयित्वा व्रजंश्रीभगवदुपरि भ्रामयित्वा तज्जलपानेन तदनन्तरमाशीर्भि
अनेन सुदृढस्नेहवत्त्वास्नेहकार्यमेव सर्वैर्व्रजवासिभिः कृतं न तु महात्म्यदर्शनजनितगौ
३ रवेण नमनविज्ञप्त्यादिकमपि तदेवोक्तं तं प्रेमवेगानिन्नतीव्रजोकसइत्यादिना । अतः या
वत्सुदृढः स्नेहो भवति तावदेव माहात्म्योपयोगः न तु सुदृढस्नेहोत्पत्त्यनन्तरमपीति स
र्वमनवद्यं । एतदेव भक्तिमीमांसायां शाण्डिल्यैरपि अथातो भक्तिजिज्ञासेत्युक्त्वा
सा परानुरक्तिरीश्वरइत्येव भक्तिलक्षणमुक्तं । न तु माहात्म्यज्ञानपूर्वकत्वमपि ।
अतएव परत्वपरानुरक्तिस्तत्त्वपरानुरक्तेरेव सर्वात्मनाप्राबल्यं न तु माहात्म्यज्ञानसम्भा

राम
३

वस्यापि । अतएव श्रीगोकुले मृत्स्नाभक्षणप्रस्तावे श्रीमुखव्यादानानन्तरं संपूर्णब्रह्माण्डदर्शनानं
तरं पूर्णमाहात्म्यज्ञाने जातेपि श्रीमातृचरणानां परमानुरक्तिवशात् माहात्म्यज्ञानस्यैव तिरोभा
वः न तु पुत्रत्वभावस्यापि । तस्मात् माहात्म्यज्ञानाद्युपाधिरहितः साक्षाद्धर्मिस्वरूपपर्यव
सायी सुदृढः ज्ञानादिसर्वानपनोद्यः सर्वतोधिकः अगणितानन्दरूपः अत्युत्पत्तिशयः
एतादृशः स्नेह एव भक्तिपदवाच्यः एतादृग्भक्तिमार्गस्य कथनात् प्रमाणपूर्वकं निरूपणात्
पुष्टिमार्गोस्तीति निश्चयः यथा श्रीगोकुले । अं एव श्रीमहावाक्यैरुक्तं । निः साधनेषु फुल्लात्मायं ब्र
हृभूतोस्ति गोकुल इति । अतएव श्रीगोवर्धनधरणप्रस्तावे तस्मान्मच्छरणं गोष्ठमित्यादिना भग
वतासप्तदिवस धारणेन लोके जीवानां देवत्वमधिपितृ आत्मा आत्मीय ऐहिक पारलौकिक

×णो२ ×त३

इतिसप्तरक्षकाः प्रसिद्धाः तदुक्तात: पृथक्कृतत्वात्स्वसंबंधस्थापनेनस्वयमेवरक्षांकरोति न
केवलं स्वीयत्वसंपादनं पुष्टिरूपमितिज्ञापनार्थ्यां वार्य्यैरुक्तं पुष्टिरस्तीति निश्चय इति ॥२॥ एवं
पुष्टिस्वरूपमुक्त्वा प्रवाहस्वरूपमाहुः । द्वौ भूतसर्गाविति । गीतासु द्वौ भूतसर्गौ लोकेस्मिन्नि
त्यारभ्य मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिमित्यंतं प्रवाहलक्षणस्योक्तत्वात् आसुरा जीवा
एव प्रवाहपदवाच्याः । तेषां कदापि कुत्रापि मामप्राप्यैवेति भगवद्वाक्यात् भगवत्संबंधाभाव
४ त् आनंदराहित्याच्च प्रावाहिकत्वमेव नदीप्रवाहपतिततृणकाष्ठादिवत्कुत्रापि स्थितिगति राम
पर्य्यवसानाभावात् प्रवाहरूपत्वमेव । यद्यपि तेषां अंधंतमःप्रवेशरूपा आसुरीमुक्ति ४
रस्ति तथापि तस्याः सुखदुःखात्यंताभावरूपत्वेनानंदशून्यत्वात् प्रवाहरूपत्वैवेतिज्ञापनाय

भगवतोक्तं ततो यांत्यधमां गतिमिति तस्या मुक्तेरधमत्वात् प्रवाहरूपत्वैवेत्या वार्य्यैरुक्तं द्वौ भूत
सर्गावित्युक्तेः प्रवाहोपि व्यवस्थित इति । एवं प्रवाहलक्षणमुक्त्वा मर्य्यादालक्षणमाहुः । वेद
स्येति । वेदस्येति सामान्यकथनात् कांडद्वयात्मको वेद उक्तः । तत्र कांडद्वयेपि मर्य्यादाया निरू
पितत्वात् । तत्र पूर्वकांडे कर्म्मनेम मर्य्यादां निरूप्य उत्तरकांडे ज्ञानमर्य्यादां निरूपयित्वातेति
वेद एव मर्य्यादा इयं सहैव प्रमाणमित्युक्तं । एवं कर्म्ममर्य्यादा ज्ञानमर्य्यादा सहैव वेद एव प्रमाण
मितिज्ञापनाय । वार्य्यैरुक्तं वेदस्य विद्यमानत्वान्मर्य्यादापि व्यवस्थितेति ॥३॥ एवं मर्य्यादास्वे
वेद एव प्रमाणं निरूप्य कर्म्ममार्गज्ञानमार्गयोरपि भक्तित्वमाशंक्य निराकुर्वंति । कश्चि

देवहीति। अस्यायमर्थः। कर्म्ममार्गस्य सकामनिःकामभेदेन द्विरूपत्वं। तथा चोक्तं श्रीभगवद्गी
तायां। त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते। ते पुण्यमासाद्य सुरेन्द्रलोक
मश्नंति दिव्यान् दिवि देवभोगान्। ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशं
ति। एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामा लभंते। इति भगवद्वाक्यात् सकामकर्म्ममा
र्गिणां लौकिककामासक्तत्वात् न भक्तिगंधोपि। निःकामकर्म्ममार्गिणामपि चित्तशुद्धिद्वा राम
५ रा ज्ञानोत्पत्तिहेतुत्वेन ज्ञानमार्गपर्य्यवसायित्वमेव न तु भक्तिपर्य्यवसायित्वमिति न भक्तित्वं। न ५
नु मर्य्यादामार्ग्गीयज्ञानस्य ब्रह्मविदाप्नोति परमिति भक्तित्वमस्त्विति चेत् सत्यं यद्यपि मर्य्या
दामार्ग्गीयज्ञानस्य। ब्रह्मविषयत्वमस्ति तथापि शुद्धज्ञानमार्गी ब्रह्मपदस्याक्षरपर्य्यवसानात्

भुक्ता

न भक्तिरूपत्वं। यथा ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्यो
मन् सोश्नुते सर्व्वान् कामान् सह ब्रह्मणा विपश्चितेति श्रुत्या। श्रुत्यंतरेणापि न संदृशे तिष्ठ
ति रूपमस्य न चक्षुषा पश्यति कश्चनैनं। हृदा मनीषा मनसाभिक्लृप्तो य एतं विदुरमृतास्ते भव
न्तीत्यादिश्रुतिभिर्मुक्तिफलत्वेन ब्रह्मस्वरूपज्ञानमुक्तं। ज्ञानमार्गे यो वेद निहितं गुहाया
मित्युक्तत्वात् हृदयाकाश एव अक्षरब्रह्मस्वरूपचिंतनं मुक्तिसाधनत्वेनोक्तं। श्रुत्यंतरेपि।
हृदा मनीषा मनसाभिक्लृप्तो य एतं विदुरिति कथनात् ब्रह्मस्वरूपं प्रादेशमात्रं अंगुष्ठ
मात्रं वा हृद्येव कल्पयित्वा हृद्येव दर्शनं न तु भक्तिमार्गवत्। बहिरपि इति। अत एव
आचार्यैरुक्तं वेदस्य विद्यमानत्वान्मर्य्यादापि व्यवस्थितेति। एतावता वेदोक्तहा

नमार्गीमर्य्यादा ... पि चव स्थितेति । एतावत्येव वेदोक्तज्ञानमार्गीयमर्य्यादा । एवं मर्य्यादा व
स्यामुक्तायां केश्चिदेव हि भक्तो हि इति कथनस्यायमाशयः । पूर्वोक्तमर्य्यादामार्गीयस्यापि क
दाचिदपि भगवदनुग्रहेण भगवद्भक्तसंगेन वा यदि भगवति स्नेहोत्पन्नो भवेत्तदा तस्यापि म
र्य्यादामार्गीयभक्तत्वेन भगवत्प्रियत्वं भवति । अत एव गीतायां श्रीभगवतोक्तं । अद्वेष्टा सर्व
भूतानां मैत्रः करुण एव च । निर्म्ममो निरहंकारः समदुःखसुखः क्षमी । संतुष्टः सततं योगी य राम
तात्मा दृढनिश्चयः । मय्यर्प्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रिय इति कश्चिदेवेति कथनात्
६ ज्ञानमार्गीयभक्तिप्राप्तौ दुर्ल्लभत्वमुक्तं । हीति युक्तस्यायमर्थः । एकवारं हि शब्दे युक्तार्थ ६
त्वमुक्त्वा पुनर्हि शब्द कथनस्यायमाशयः । मर्य्यादामार्गीयो यदा मर्य्यादामार्गीयभक्तसंग

।दो२ ।स्प२

त्या भक्तः स्यात्तदा जडभरतवत्प्रसिद्ध एव भवेदिति प्रसिद्धिज्ञापनार्थं हि शब्दः । ननु मर्य्यादा
मार्गेपि भक्तिकथनात् मर्य्यादामार्गीयभक्तेः पुष्टिभक्तेश्च समत्वं भवति ... त्याशंक्या निरा
साय आहुः । सर्वत्रोत्कर्षकथनादिति । श्रीभागवतगीतादिषु भक्तियोगा बहुविध इति याव
न्तो भक्तिभेदा उक्तास्तेभ्यः सर्वेभ्यः उत्कर्षकथनात् पुष्टिरस्तीति निश्चयः सिद्धः । उत्क
र्षश्च । यथा गीतायां । तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः । कर्म्मिभ्यश्चा
धिको योगी तस्माद्योगी भवार्जुन । युक्त्वा योगिनामपि सर्वेषां मद्गतेनांतरात्मना । श्रद्धा
वान्भजते यो मां स मे युक्ततमो मत इति भजनस्यैव सर्वोत्कर्षकथनात् । साक्षा । कृष्णं तु पु
ष्टिमार्गे एव न तु मर्य्यादाभक्तावपि । श्रीभागवते भगवद्वचनं । तस्मान्मद्भक्तियुक्तस्य योगि

थ२

नोद्वेमदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहेति । तथा च श्रुतिरपि । तमु स्तोतारः पू
र्व्यं यथा विद स्तत गर्भं जनुषा पिपर्तन । आस्य जानंतो नाम चिद्विवक्तन महस्ते विष्णो सुम
तिं भजामहे । इति श्रुतावपि भजनस्यैवोक्तत्वात् तद्भजनं पुष्टिमार्ग एवेति सर्वत्र पुष्टिमा
र्गस्यैवोत्कर्ष उक्त इति ज्ञापनायोक्तं सर्वत्रोत्कर्षकथनात् सर्वमार्गेभ्यः पुष्टिरुत्कृ
ष्टेति ज्ञापनायोक्तं पुष्टिरस्तीति निरा[illegible] स्वयं निर्गलिता[illegible]र्थः । तथा च गीतायां । यो राम
मामेवमसंमूढो जानाति पुरुषोत्तमं । स सर्वविद्भजति मां सर्वभावेन भारतेति कथनात्
७ सर्वभावेन भजनं पुष्टिमार्ग एव न त्वन्यत्रापीति । सर्वोपि प्रकारभेदभिन्नः सर्वोपि भक्तिमा ७
र्गः मिलितः कदाचिदेतत्समो भविष्यतीत्याशंकानिरासायाहुः । न सर्व इति । एतत् पुष्टिमार्ग

समः सर्वः सर्वोपि कोपि मार्गः न । अतः पुष्टिमार्गः प्रवाहात् भिन्नः वेदादपि वेदनिरूपित
मर्यादामार्गादपि भिन्नः । कुतः भेदतः । स्वरूपसाधनफलभेदतः । भेदादित्यर्थः । अत्र भेदे
प्रमाणांतरमाहुः । यदा यस्येति वचनादिति । यदा [illegible] यस्यानुगृह्णाति भगवानात्मभा
वितः । स जहाति मतिं लोके वेदे च परिनिष्ठितामिति यदा यस्यानुगृह्णाति भगवान् पुष्टिमा
र्गे अनुगृह्णाति इति पदात् यदा अनुग्रहं [illegible] करोति तदैव पुष्टिमार्गे प्रवेशो भवति तदा प्रवा
हात् मर्यादातोपि पृथक् करोति । अत एव अनुग्रहः पुष्टिमार्गे नियामक इत्याचार्यवचनं । गी
तास्वपि । नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा । भ
क्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेति । अनन्यया

भक्त्यातिविवर्त्तनात् पुष्टिरूपया भक्त्या द्रष्टुं शक्य इति भक्तिमार्गस्य साक्षाद्दर्शनहेतुत्वं ।
न तु ज्ञानमार्गवत् मनस्यैतिनियमः । इत्याद्यनेकहेतुभ्यः सर्वोत्तमत्वात् प्रवाहमार्गात् त
मर्यादामार्गाच्च भेद उक्तः । अथ कश्चित्पूर्वपक्षी शंकते । मार्गैकत्वमिति । अन्यासां पुष्टिप्रवा
हमर्यादादीनां एकत्वमेव भक्तिरूपत्वमेव । अस्यार्थः । यद्यपि पुष्टिमार्गस्य भक्तित्वमुभयवा
दिसंमतमेव तथापि अन्यौ प्रवाहमर्यादे न तु भक्त्यंगभूते एवं सतितेपि भक्त्यागमो भक्ति
प्रतिपादकशास्त्ररूपे मताविति तयोर्यद् भक्त्यंगत्वं ब्रवीषि तत्र प्रमाणासिद्धं तत्प्रमाणपूर्व राम
८ कं तयोर्भक्त्यंगत्वं निराकरयो प्रमाणमाहुः । स्मृत्वैतो हीति । सूत्रं भक्तिमीमांसासूत्रं तदयथा ८
तत्संस्थस्यामृतत्वोपदेशात् । अस्यार्थः । तत्संस्थस्य भक्तिमार्गप्राप्यपुरुषोत्तमे निष्ठस्य अ
निराकुर्वन्ति । न तद्युक्तमिति । तत्र प्रवाहमार्गस्य न त्वंगत्व

मृतत्वतन्मार्गीयस्य साक्षाद्भगवत्संबंधस्यामृतत्वोपदेशात् । अमृतत्वकथनात् इति भक्तिमार्गी
यसाधनफले निरूपिते । उपदेशस्तु । अनिमित्ता भागवती भक्तिर्मुक्तेर्गरीयसी । अरत्वेवमेव भग
वान् भजतां मुकुंदो मुक्तिं ददाति न कर्हिचित् स्म न भक्तियोगमित्यादि प्रवाहमार्गस्य प्रवृत्तिर्वा नि
वृत्तिर्वेत्यारभ्य मामप्राप्यैव इत्यंतेष्वमसंदर्भेष्वमना — स्वसंबंधाभावकथनेन । अथ भक्तिमार्गीय
मुक्तेरमृतत्वकथनेन प्रवाहमार्गी मुक्तेरधमगतित्वकथनेन प्रवाहमार्गस्य न भक्त्यंगत्वमिति त्व
उक्तांगत्वशंका निरस्ता । एवं प्रवाहमार्गस्य भक्त्यंगत्वं निराकृत्य मर्यादामार्गस्यापि भक्त्यंगत्वं नि
राकुर्वन्ति । युक्त्या हि वैदिक इति । भिन्न इति । शेषः । युक्त्यैकवचनं जात्यभिप्रायेण । तत्रैता
युक्तयः । भगवद्गीतास्तु द्वादशाध्याये । एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्ष

ज्ञानयो
रमव्यक्तं तेषां के योगवित्तमा इति । अर्जुनेन भक्तिस्तारतम्ये प्रश्ने कृते सति भगवता । मय्यावे
श्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मता इति भक्तिमार्गोत्क
र्षमुक्त्वा तदनंतरं ज्ञानमार्गस्य अक्षरपर्य्यवसायित्वेन तारतम्यज्ञापनार्थं ये त्वक्षरमनिर्देश्य
मव्यक्तं पर्युपासते । सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं । संनियम्येन्द्रियग्रामं सर्वत्र समबु
द्धयः । ते प्राप्नुवंति मामेव सर्वभूतहिते रताः । क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां । अव्य राम
२ क्ता हि गतिर्दुःखं देहवद्भिरवाप्यते । अत्र भगवता ते प्राप्नुवंति मामेवेति पदुक्तं तदक्षरस्य पुरुषो २
त्तमविभूतिरूपत्वात् ज्ञानमार्गस्याक्षरपर्य्यवसायित्वज्ञापनार्थं तत्प्राप्तौ सन्नियम्येन्द्रियग्रामं इ
त्यारभ्य अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यत इत्यंतेन साधनानां क्लेशसाध्यत्वमुक्तं । एतदग्रे
नां त्रि

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय । निवसिष्यसि मय्येव अत ऊर्ध्वं न संशय इति भक्तिमा
र्गसाधनानां सुखरूपकृतकथने न अनायासेन स्वप्राप्तिहेतुत्वमुक्तं । मय्येवेत्येवकारेण पु
रुषोत्तमपर्य्यवसायित्वं च । यद्यपि पूर्वं ते प्राप्नुवंति मामेवेत्यत्रैवकारेण पुरुषोत्तमपर्य्यवसा
यित्वमपि संभवति तथापि तत्र ये त्वक्षरमित्यक्षरमेवोद्दिश्य मामेवेत्युक्तत्वात् मामि ति पद
स्याक्षरपर्य्यवसायित्वमेव । अत्र तु मय्येव मन आधत्स्वेति सुखरूपं भक्तिमार्गमुद्दिश्य कथ
नेन मय्येव पदं पुरुषोत्तमपरमेव । एवं मर्य्यादामार्गभेदिकामेकां युक्तिमुक्त्वान्यां युक्तिमा
ह । तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह इति
यत्र भक्तियुक्तस्य मर्य्यादामार्गीय ज्ञानस्य श्रेयस्त्वतापि नोपयोगिस्तत्र मर्य्यादामार्गी

एतानस्य दुस्तरांगस्य वैराग्यस्यापि भक्त्यंगत्वाभावेपि किंवाच्यमित्यपि युक्तिः। पुष्ट्यंतरमपि
नायं सुखापो भगवान् देहिनां गोपिकासुतः। ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिहेत्य
त्र गोपिकासुत इति भगवति पूर्णपुरुषोत्तमत्वमुक्त्वा तस्य भक्तिमतां सुखावाप्तिकथनेन ज्ञा
निनां अक्षरप्राप्तौ क्लेशयुक्तत्वभावेन तदुक्त्या कथनेन भक्तिमार्गे पुरुषोत्तमः प्राप्यः सर्वत्र ज्ञा
यास्ते नैव प्राप्यः ज्ञानमार्गे अक्षरप्राप्तिः साऽपि न अविकृततत्क्लेशेनेति मार्गभक्तिमार्गभेदिकायपु
रुषः किमतो विकल्पं वा यांति इति ज्ञापनायोक्तं भिन्नो पुष्टिहि वैदिकादिति। पूर्वं सूत्रतो हीति
१० वाक्येन सूत्रप्रामाण्येन प्रवाहमार्गस्य भक्तिमार्गांगत्वाभावस्य पुष्टत्वं ज्ञापितं। पुष्ट्याहि वै १०
दिक इत्यत्र युक्तीनां गीताभागवतादिषु मर्यादामार्गस्य भक्तिमार्गांगत्वाभावप्रसिद्धियो

राम

यु
नर्नोहि वाह्यः ॥६॥ एवं सूत्रयुक्तिभ्यां प्रवाहमर्यादयोः पुष्टिमार्गांगत्वाभावं निरूप्यातः परं पुष्टि
मार्गीयानां जीवदेहकृतीनां मार्गद्वयापेक्षया सर्वात्मना सर्वप्रकारकोत्कर्षज्ञापनाय मार्गत्र
यस्य जीवदेहकृतीनां स्वरूपं निरूपयंति। जीवदेहकृतीनामिति। प्रवाहमार्गे जीवा आसुरा देवजी
वेभ्यो भिन्नाः तेषां देहा भगवज्ज्ञानप्राप्तिप्रतिकूल्यात् देवदेहेभ्यो भिन्नाः तेषां प्रकृतिरपि स्वार्थं पशु
हिंसादिरूपा देवजीवकृतेः सकाशाद्भिन्नैव। एवं मर्यादामार्गीया देवजीवाः प्रवाहमार्गीयासुर
जीवेभ्यो भिन्नाः। तेषां देहा अपि वैदिकधर्मभगवत्पूजाद्यानुकूल्यात् आसुरीजीवदेहेभ्यो भिन्ना
न्नाः। तेषां कृतिरपि अग्निहोत्रादिश्रौतकर्मकरणेन मर्यादामार्गे प्रकारक भगवत्पूजादि
करणेन ज्ञानोत्पत्त्यनुकूलत्यागादिकरणेन च भिन्नैव। ननु भगवता प्रवाहमर्यादयोर्जीवदेहकृ

४ कै २

तीनां भिन्नत्वं निरूपितं तत्र यथा मार्गद्वयेपि देहकृतीनामनित्यत्वं प्रतीयते तथा मार्गद्वयजीवा
नामप्यनित्यत्वं भवत्वित्याशंकां निराकुर्वंति । नित्यत्वेतिपद्येन । तत्र हेतुः श्रुतेः । तत्रेयं श्रुतिः ।
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो
अभिचाकशीतीति इति श्रुत्या अंतर्यामिनित्यत्ववत् जीवस्य नित्यत्वं साधितमिति न जीवानाम
नित्यत्वं । अथवा । एवं मार्गद्वये जीवदेहकृतीनां भिन्नत्वं निरूप्य मार्गद्वयजीवदेहकृतीनां नि
त्यत्वं न प्रतीयते तथापि देहकृतीनां नित्यता श्रुतेरिति नित्यत्वकथनस्यायमाशयः । प्रवाहमार्गी
११ योजीवो यथा कश्चिद्धृते देहांतरं गृह्णाति तदा पूर्वदेहजन्यकृतानुक्रमेव देहं गृह्णाति प्राचीनदेहक ११
र्मानुसारेणैव कर्म करोति न तु पूर्वदेहपरावृत्तो देहांतरं प्राप्नुमिति पूर्वदेहधर्मपरावृत्तिरपि

राम

नित्यत्वकथनस्यायमाशयः । तत्र जीवानां नित्यत्वं सर्ववादिसंमतमस्त्येव · परंतु यद्यपि देहकृतीनां ४

रपि भवति । एवमेव पूर्वकर्मणोपि । एवं प्रतिजन्मनि देहधर्मकर्मणां तादृशत्वं न तु विपर्या
सः । एवं देहकृतीनां प्रवाहिकरीत्या नित्यत्वज्ञापनायोक्तं नित्येति । तत्र हेतुः श्रुतेरिति ।
श्रुतिश्च सत्यं चानृतं च सत्यमभवत् । यदिदं किंच तत्सत्यमित्याचक्षते इति । अथवा । देह
कृतीनां नित्यता लिंगशरीराभिप्रायेण ॥ एवं मर्य्यादामार्गेपि जीवदेहकृतीनां नित्यता ज्ञेया ·
एवं यथा प्रवाहमर्य्यादामार्गीयजीवदेहकृतीनां भिन्नत्वं नित्यत्वं चोक्तं तथा पुष्टिमार्गेपि जी
वदेहकृतीनां भिन्नत्वं नित्यत्वं चाहुः । तद्वत् पुष्टिमार्ग इति । यद्यपि मर्य्यादामार्गीयजीवा दै
वाः पुष्टिमार्गीया जीवाश्च दैवा एव तथापि द्वयोरपि दैवजीवत्वेपि मर्य्यादामार्गीयजीवादी
नां निषेधपूर्वकं पुष्टिमार्गीयजीवादीनां भिन्नत्वं चाहुः । द्वयोरपि निषेध इति । तत्र भेदप्रका

र: ।देवत्वेपि पुष्टिमार्गे अनुग्रहः ।पुष्टिमार्गो नियामक इति वचनात् पुष्टिमार्गीयजीवानाम
नुग्रहविशिष्टत्वं ।ननु मर्यादामार्गीयजीववद्विध्यधीनत्वमपि ।किं वा पुष्टिमार्गीयजीवानां
यमेवैष वृणुते तेन लभ्य इति श्रुत्या साक्षात्पुरुषोत्तमवरणात् साक्षात्पुरुषोत्तमप्राप्तिरेव
मर्यादामार्गीयाणां तदभावादक्षरप्राप्तिरेव । यथा मर्यादामार्गीयदेहस्याग्निहोत्राद्यनुकू राम
लत्वं तथा पुष्टिमार्गीयदेहस्य रडऽपुष्टिमार्गीयाचार्यप्रकटितभगवत्सेवापरत्वमेव न
त्वन्यपरत्वमिति देहभेदः ।देहभेदनिरूपणेन कृतेरपि देहाधीनत्वात् कृतिभेदः सिद्धए १२
१२ वेति नानुपपन्नं किंचित् ।अथवा ।यद्यपि पुष्टिमार्गीयजीवदेहकृतीनां पूर्वोक्तप्रवाहि
करीत्यानित्यत्वं ।अस्त्येव तथापि प्रकारान्तरेणापि नित्यत्वमुच्यते ।साक्षात्पुष्टिपुष्टि

भक्तानां साक्षात्पुरुषोत्तमसंबंधिफलानुभवयोग्यदेहानां नित्यत्वमेव ।अन्यथा श्रीगोकुलवासिनां
तेनुब्रह्महृदं नीता इति मुक्त्यनुभवकाले तेनैव देहेन मुक्त्यनुभवः ।तदनंतरं तेनैव देहेन सर्वैर्यथायो२
ग्यं भक्तिमार्गीयफलानुभवयोग्यदेहानां नित्यतानस्यात्तदा मुक्त्यनुभवकाले स्थितिर्न स्यात्
तस्मात् पुष्टिमार्गीयदेहानां नित्यत्वमेवेति नानुपपन्नं किंचित् ।एवं फलोपयोगिदेहनित्यत्व
निरूपणेनैव साक्षात्पुरुषोत्तमसंबंधिफलानुभवयोग्यकृतीनां नित्यत्वमप्युक्तं सिद्धमिति दिक्
॥७॥ एवं पुष्टिमार्गीयजीवदेहकृतीनां स्वरूपं निरूप्योपसंहरंति ।प्रमाणभेदादिति ।अनुग्रहः
पुष्टिमार्गे नियामक इत्याद्युक्तप्रमाणभेदनिरूपणात् प्रवाहमर्यादाभ्यां भिन्नः सर्वोत्कृष्टः रड
ऽपुष्टिमार्गः निरूपितः हि युक्तश्चायमर्थः नहि साक्षात्पुरुषोत्तमसंबंधोपयोगिनो धर्माः

५ भेदेन

मार्गान्तरेपि संभवंतीति पुष्टिमार्गस्यैव सर्वोत्तमत्वं युक्तमेवेति ज्ञापनाय हि युक्तं । एवं प्रमाणैर्मार्गत्र
यभेदं निरूप्य एतदग्रे मार्गत्रयस्य मार्गान्तरसादृश्यनिराकरणाय पूर्वोक्तं सर्गमारभ्य फल[illegible]पर्य
वसानपर्यन्तं भेदं निरूपयंति । सर्गभेदं प्रवक्ष्यामि स्वरूपांगक्रियायुतमिति ॥८॥ तत्र प्रथमं प्रवाहमा
र्गसर्गभेदमाहुः । इच्छामात्रेणेति । हरिः इच्छामात्रेण कांश्चित् जीवानासुरान् करिष्यामीति । इच्छ सम
या मनसा प्रवाहमार्गीयसृष्टिं कृतवान् । एवं प्रवाहमार्गसृष्टिमुक्त्वा मर्यादामार्गीयसृष्टिप्रकारमाहुः
वचसेति । वचसा वेदरूपवाण्या मर्यादामार्गं सृष्टवान् मर्यादामार्गस्य वेदमूलकत्वप्रसिद्धि
१३ द्योतनार्थं हि याहुः । एवं शरीरैकदेशाभ्यां मार्गद्वयसर्गमुक्त्वा पुष्टिमार्गसृष्टेः सर्वोत्तमत्व १३
ज्ञापनाय पुष्टिमार्गसृष्टिमाहुः । पुष्टिकायेनेति । आनखमात्रकरपादमुखोदरादिरूपेण

संपूर्णकायेन पुष्टिमार्ग[illegible]मार्गसृष्टिं कृतवान् । मार्गत्रयसर्गप्रयोजनमग्रे वक्ष्यंतीति । संपूर्ण
देहेन पुष्टिसर्गस्य कथनात् पुष्टिसर्गस्य सर्वोत्तमत्वं निर्द्धारितमिति ज्ञापनायोक्तं निरवय
इति ॥९॥ एवं मार्गसर्गस्वरूपं निरूप्य मार्गभेदेन मार्गत्रयफलस्वरूपमाहुः । मूले जात इति
सृष्ट्यंतर्गतानां केषांचित् जीवानामासुरत्वसंपादिका या भगवदिच्छा सा मूले जातः ततः तदिच्छया
लोके प्रवाह[illegible]मार्गे फलं अंधंतमःप्रवेशरूपं भवतीत्यर्थः । एवं प्रावाहिकानां फलं निरू
प्य मर्यादामार्गीयाणां फलं निरूपयंति । वेदोक्ते वैदिकेपि वेति । वैदिके मर्यादामार्गे तमेव वि
दित्वाऽतिमृत्युमेति इत्यादिश्रुतिप्रतिपाद्यं अक्षरप्राप्तिरूपं फलमुक्तं एवं कर्ममार्गेपि अ
ग्निष्टोमेन [illegible]स्वर्गकामो यजेतेत्यादिश्रुति[.]पाद्यं सकामस्य स्वर्गलोकप्राप्तिरूपं फलं

निःकामयागकर्त्तुरपिस्वर्गलोककामनाभावात्स्वर्गलोकैकवर्यैर्दुःखेनसंभिन्नंनचग्रस्तमनंत
रं। अभिलाषोपनीतंयत्तत्पदंस्वःपदास्पदमितिस्वःपदलक्षणाभावात्। आत्मसुखेचस्वःप
दलक्षणायोगात् निःकामयागकर्त्तुःआत्मसुखरूपंफलंभवति। चकारात्ताहृशस्यापिभग
वदनुग्रहेणभगवद्भक्तसंगेनभक्तिप्राप्तौसत्यांमर्यादामार्गीयभक्तस्यापिमुक्तिरूपापुरुषोत्त राम
मप्राप्तिर्भवतीतिज्ञापनायचकारः। कायेनतुफलंपुरुषारितिकायेनआनन्दमात्रकरणादमुखो
दयादिरूपेणसर्वेन्द्रियास्वाद्यस्वरूपानन्ददानरूपंफलं। एतदतिरिक्त प्रकारस्यफल
७४ त्वाभावायतुशब्दः। अतएवपुष्टिभक्तिरूपाभिर्व्रजसीमंतिनीभिः। यत्स्वरूपवतामितिश्लोके ७४
सर्वभक्तिविरोधपरिहारेणासर्वेन्द्रियास्वाद्यपुरुषोत्तमस्वरूपस्यैवफलत्वंनिरूपितं। ननु
इति४

मर्यादामार्गीयभक्तेरपिपुरुषोत्तमप्रापकत्वात् पुष्टिमार्गीयभक्तेरपिपुरुषोत्तमप्राप्तिहेतुत्वात् उभ
योरपिफलैःकिंभवतीत्याशंक्यापरिहरंति। भिन्नेच्छानापि — — नैकतेति। तस्यायमर्थः। यद्य
पिमर्यादामार्गीयभक्तस्यापि अंतेपुरुषोत्तमप्राप्तिरस्ति तथापि — — तस्यमुक्तिरूपैवप्रा
प्तिर्नतुपुष्टिमार्गीयभक्तवत् साक्षात्संबंधरूपाप्राप्तिः। एतौ मर्यादामार्गीयभक्तस्यांतेस्व
प्राप्तौताहृश्येवभगवदिच्छा। अतएवश्रीभागवते अनिच्छतोपिगतिमण्वीं प्रयुंक्ते इति। पुष्टि
मार्गीयस्यसाक्षात्स्वरूपसंबंधानुभवरूपप्राप्तावेवभगवदिच्छा। यदिमार्गद्वयेपियकमेव
फलंस्यात्तदामार्गभेदवैयर्थ्यमेवस्यादित्यतउक्तं भिन्नेच्छातोपिनैकतेति ॥१०॥ एवंमार्गत्र
पस्यसर्गभेदंफलभेदंचनिरूप्यतेषांनया। तांस्वरूपांगकृत्यानिरूपयंति। तत्रप्रथमंप्रवा

हमार्गीयाणां स्वरूपमाहुः। तानहं द्विषतो वाक्यादिति। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। माम प्राप्यै
व कौन्तेय ततो यान्त्यधमां गतिमिति। प्रवाहमार्गीयजीवा मर्य्यादामार्गीयपुष्टिमार्गीयजीवेभ्यो
भिन्ना आसुरा इत्यर्थः। अत एवेतरौ मर्य्यादामार्गीयपुष्टिमार्गीजीवौ प्रवाहमार्गीयजीवेभ्यो
भिन्नौ देवावित्यर्थः। भेदप्रकारमाहुः॥ सौ ताविति। तत्तन्मार्गीयफलपर्य्यवसानौ तौ। फलस्व राम
रूपमाहुः मोक्षप्रवेशादिति स्वस्वमार्गीयमोक्षप्रवेशात् इत्यर्थः। ननु प्रावाहिकानां जीवाना १५
मपि तन्मार्गीयमोक्षप्राप्त्या सांतत्वसंभवेपि उभयोरेव सांतत्वकथने को हेतुरिति चेत् किंच ततो
१५ यान्त्यधमां गतिमिति तन्मुक्तेरधमगतित्वनिरूपणात् आनन्दरूपफलपर्य्यवसानाभावात्
✓ सत्यं यद्यपि तन्मार्गीयमुक्त्या तस्यापि सांतत्वं संभवति तथापि तन्मुक्तेरानंदराहित्यान्मोक्ष
लक्षणाभावात् २

✓ भविता २
रसांतत्वेन गणनातौ। न सांतत्वमिति उभावेव सांतौ गणितौ। ननु प्रवाहोपीति ज्ञापनायोक्तं सांतौ मो
क्षप्रवेशात इति सामान्योक्त्या मोक्षस्य मार्गद्वयेपि एकरूपतोक्त्या शंकानिरासायाहुः तस्मादिति।
तस्मात् पूर्वमेव पुष्टिमार्गीयाणां कायेन तु फलं पुष्टावित्यत्र फलभेदोपि निरूपित एव तथापि
पुनरपि यत् मोक्षप्रवेशात इति सामान्योक्त्या फलैकत्वशंका तन्निरासाय विशेषतस्तेषां पुष्टिमा
र्गीयजीवानां स्वरूपमाहुः। तस्माज्जीवाः पुष्टिमार्गे भिन्ना इति। मर्य्यादामार्गीयेभ्यो भिन्ना
एव अत्युत्कृष्टा एवेत्यर्थः। तेषां कदाचित् मार्गान्तरीयसंगेपि मार्गान्तरप्रवेशो न भ
वतीति ज्ञापनाय न संशय इत्युक्तं। अतः परं केवलपुष्टिसृष्टेः सर्वात्मना सर्वतो भेदेन सृष्टे
तत्कृष्टनिरूपणस्य प्रयोजनमाहुः। भगवद्रूपसेवार्थमिति। यथा मर्य्यादासृष्टेः तन्मार्गीय
प

धर्म्मकरणं प्रयोजनं तथापि पुष्टिस्थैर्भगवत्सेवाकरणमेव प्रयोजनमत उक्तं भगवद्रूपसे
वार्थमिति यद्यपि मर्यादामार्गे सेवा वर्त्तते परंतत्र मनस्येव अंगुष्ठमात्रादिरूपकल्पनेन न तु सा
क्षादनन्तमात्रकरणादमुख्यादर्शरूपेण प्रकटस्येति ज्ञापनाय रूपपदमुक्तं। नान्यथेति। एतत्प्रयो
जनातिरिक्तप्रयोजनाभावार्थमुक्तं नान्यथेति। यदीदं प्रयोजनं भवेत्तदा पुष्टिस्थितिरेव न भवे
दत उक्तं। नान्यथा भवेदिति। सेवाकरणप्रकारमाहुः स्वरूपेणेति। यद्यपि केवलस्वरूपप राम
दं केवलजीवपरमपि भवति तथाप्यत्र फलरूपसेवाकरणप्रकारं निरूपयन्तो देहरहितके
१९ वलजीवस्वरूपेण सेवाकरणासंभवात् स्वरूपपदं लीलोपयोगिदेहपरमेव। देहस्य फल १९
रूपसेवोपयोगिदेहस्वरूपं निरूप्याविर्भावप्रकारमाहुः। अवतारेणेति। अवतारेण साक्षात्फ
फलोपयोगिफलरूपभजनोपयोगित्वकथनेनाविच्छिन्नतत्संबन्धानन्दमयत्वं ज्ञापितम्। एवं साक्षाद्भजनोपयोगि॰

न्नरूपभजनोपयोगिसमाजमध्ये प्राकट्येन। भजनोपयोगिप्रकारांतरमाहुः। लिंगेनेति।
भजनोपयोगिदेहविशेषेणेत्यर्थः। वकारास्तु उपयोगिवयः समुच्चयार्थः। पुनः प्रकारांतरमाहुः
गुणेनेति। गुणाः सौन्दर्यरसोद्बोधकत्वचातुर्यभावादयः। फलभोगस्य सम्यक्ज्ञातत्वप्रकारज्ञाप
नाय वकारः। ननु पुष्टिमार्गीयफलानुभवः भोक्तृभोग्यसाम्ये सति संपूर्णो भवति। ननु एतत्कि
चित्तारतम्येन। प्रभोः अगणितानन्दस्वरूपत्वेन भजनरसानुभवकर्त्तॄणां तत्समत्वाभावात्
पूर्णरसानुभवो न भविष्यतीत्याशंकापरिहाराय स्वरूपेणेत्यादिना। भजनरसानुभवकर्तृयो
ग्यताप्रकारं निरूप्य पूर्णरसानुभवसिद्धिहेतुमाहुः। तारतम्यं न स्वरूप इति। पूर्वोक्तरसानुभ
वकर्तृयोग्यप्रकारैः पूर्णस्वरूपरसानुभवसिद्धिप्रतिबंधहेतुतारतम्याभाव उक्तः। तारतम्यं
तो॰

नस्वरूप इति। स्वरूपे यथानन्दमात्रकरपादमुखोदरादि[illegible]देर्भगवतः आत्मनि देहे वा आनंद
प्रायत्वेन तारतम्याभावस्तथा साक्षात्फलानुभवकर्तृभोक्तृष्वपि आत्मनि आत्मस्वरूपे देहे वा
आनन्दमयत्वादिना तारतम्याभावः। ननु प्राकृतदेहवत् देहात्मनोस्तारतम्य मे[illegible]पि। अन्यथा
उभयत्र पूर्णरसानुभावो न स्यात्। एवं देहात्मनोस्तारतम्याभावमुक्त्वा तत्क्रियास्वपि तारतम्य
भावमाहुः। तत्क्रियास्विति। क्रियास्विति। क्रियासु तारतम्याभावप्रकारविशेषः। यथा भ राम
गवान् कर्तृकरसो योगि क्रियाविशेषैर्भगवति परमानन्दरसानुभव इति तारतम्याभावः। सर्व
१७ त्र तारतम्याभावस्य [illegible]पनाय वा शब्दः। यद्यपि सर्वत्र तारतम्याभावोस्त्येव तथापि भगवान् ततो १७
पि अनिर्वचनीयपरमकाष्ठापन्नरसानुभवार्थं तारतम्यमपि करोतीत्याहुः। तथापि यावतेति।

यथा फलप्रकरणीय प्रथमाध्याये वाहुप्रसारपरिरंभेति श्लोके उत्तंभयन् रतिपतिं रमयां चका
रेति स्वरमणेन पूर्णरसानुभवं कारयित्वा अग्रिमश्लोके आत्मानं मेनिरे स्त्रीणां मानिन्योप्यधिकं
भुवीति स्वरूप पराष्ट्र त्रिरूपेण पूर्णरसानुभवं कारयित्वापि पुनश्च फलप्रकरणीय चतुर्थाध्याये
तद्दर्शनाह्लादविधूतहृद्रुज इति श्लोके मनोरथान्तं श्रुतयो यथा ययुरित्यनेन भक्तमनोरथागम्य
मपि पूर्वाननुभूतपूर्णरसतारतम्यं ज्ञापयितुं स्वरूपानन्दं दत्तवान् इति प्रकारं ज्ञापयितुमुक्तं यावते
ति। यावता तारतम्येन तस्यैव भक्तस्य कार्यं मनोरथान्तररूपं स्वरूपानन्दानुभवं सिध्यति तावत्ता
रतम्यं करोति। यत्र पूर्णरसदानार्थं तारतम्याभावं येषु भक्तेषु संपादितवान् तेषु मनोरथान्तं स्वरू
पानन्ददानं पुनरमेवेति ज्ञापनार्थं हि शब्दः॥ एवं प्रकारभेदे [illegible]नरदहूमार्गत्रयाणां फलपर्य

यस्मान्मुक्ता शुद्धमिश्रभेदेन मार्गत्रयेपि द्वैविध्यमाहुः। ते हि द्विधेति। एवं द्वैविध्ये शुद्धभेदप्र
कारस्य पूर्वोक्तत्वादतः परं मिश्रभेदस्य भेदत्रयमाहुः। मिश्रास्त्रि सपुनरिति। मिश्रेषु त्रैविध्यं
दर्शयति। प्रवाहादिविभेदेनेति। त्रैविध्यदर्शनप्रयोजनमाहुः। भगवत्कार्य्यसिद्धय इति। भ
गवत्कार्य्यमा र्गत्रयसर्गरूपं तत्सिद्धये मार्गत्रयविवेकज्ञानसिध्यर्थमित्यर्थः। अथवा। राम
भगवत्कार्य्यलीलारूपं तत्सिद्धये क्रीडारससिद्ध्यर्थ मित्यर्थः। अत एव श्रीभागवते वंध्याव
त्याप्युक्तं। क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं नु तत्र कुधियोपर ईश कुर्युरिति। मिश्राणां १८
१८ त्रैविध्यं दर्शयंति। पुष्ट्या विमिश्रा इति। ये सर्व्वज्ञास्ते सर्व्वज्ञत्वेन पुष्टिमार्गोत्कर्षज्ञाता पुष्ट्या
विमिश्रा भवंति। यथा नारदोद्धवः प्रह्लादादयः। ये पूर्णज्ञानफलनिष्ठा न संतः पुष्टि स्वरूपा

भिन्नास्ते पुष्ट्या विमिश्रा भवंति। पुष्टिमार्गाभिज्ञत्वे हेतुः सर्व्वज्ञा न इति। ज्ञाननिष्ठा तदा ज्ञे
यासर्व्वज्ञो हि यदा भवेत्। ये स्वभावतः पर्याप्तज्ञाननिष्ठाः संतः सर्व्वज्ञत्वात् पुष्टिमार्गस्वरूपाभिज्ञा
स्त एवोक्ताः पुष्ट्या विमिश्राः सर्व्वज्ञा इति। अतः परं प्रवाहविमिश्रस्य प्रकारमाहुः। प्रवाहेण
क्रियारता इति। ये स्वभावतः काम्यकर्म्मरताः काम्यकर्म्मनिष्ठाः संतः प्रवाहेण विमिश्रा जातास्त
दाविशेषेण काम्यकर्म्मनिष्ठाः काम्यकर्म्मरताः काम्यकर्म्मजडा एव भवंति। यथा सर्व्वज्ञाः पुष्ट्या
वि३ मिश्रा भवंति न तद्वत् ये प्रवाहेण विमिश्रास्ते कर्म्मजडा एव भवंति। न तु मार्गांतरविमिश्रा भ
वंति। त एवोक्ताः प्रवाहेण क्रियारता इति॥१५॥ एवं प्रवाहविमिश्रप्रकारमुक्त्वा मर्यादा
विमिश्रप्रकारमाहुः। मर्यादया गुणज्ञा इति। ये शुद्धमर्यादामार्गीयास्ते मर्यादामार्गी

यभक्तसंग विमिश्रणेन भगवद्गुणपरा भवंति । भगवद्गुणज्ञा इति । एवं मिश्रभेदान्निरूप्य
सर्वतः सर्वोत्कृष्टत्वज्ञापनाय केवलपुष्टिमार्गीयान् निरूपयंति । शुद्धाः प्रेम्णेति । शुद्धा
प्रेम्णा पुष्टिमार्गीयभावातिरिक्तभावांतररहितास्ते अतीव दुर्लभाः । अतीवदुर्लभा इत्यत्रा
तीवपदात् भगवदनुग्रहैकलभ्या इत्यर्थः । एवं मिश्रभेदप्रकारेण मार्गत्रयं निरूप्य शुद्धपुष्टि
प्रकारनिरूपणेन पुष्टिमार्गस्य सर्वोत्कृष्टत्वं निरूपयंति । एवं तेषां मार्गत्रयाणां सर्गभेद राम
प्रकारमुपसंहरति । एवं सर्ग इति । एवं अनेन प्रकारेण सर्गभेदमुपसंहृत्य तेषां फलनिरू
१९ पणं प्रतिजानते । फलं तत्र निरूप्यत इति ॥१८॥ अत्र मार्गत्रयनिरूपणप्रस्तावे मार्गत्रयस्य फ १९
लं निरूप्यते । तत्र पूर्वं पुष्टिमार्गस्य फलमाहुः । भगवानेव हि फलमिति । अत्र भगवत्पदे

न साक्षात्पुरुषोत्तम उक्तः । एवकारेण साक्षात्स एव नतु मात्रकरणाद्यन्मुखोदरादिरूपेण प्रकटप्र
वफलं । स यथा पूर्वोक्तस्वरूप एव भुवि पुष्टिमार्गीयभक्तस्थितिस्थाने आविर्भवेत् प्रकटो भवे
त् कदाचित् ज्ञानभक्त्यादेर्न हृद्येव भावनाप्रकारेण प्राकट्यं भविष्यतीत्याशंकानिरासायाहुः
गुणस्वरूपभेदेनेति । गुणाः ईक्षणभाषणादिलीलारूपाः स्वरूपं तु पूर्वोक्तमेव तद्भेदेन तत्तत्
प्रकारभेदेन यथा प्रकटो भवेत् तथा तेन प्रकारेण प्रकारभेदेन तेषां भक्तानुभवहेतुर्भवेदित्य
र्थः । पुष्टिमार्गीयाणां साक्षात्संबंधस्यैव फलत्वमेवाप्युक्तमिति ज्ञापनाय हि शब्दः ॥१९॥ ननु
पुष्टिमार्गस्य सर्वोत्कृष्टत्वं यद्यपि सर्वप्रमाणसिद्धं तथापि तन्मार्गीयस्यापि दृष्टस्यासुरयोनि
प्रवेशे को हेतुरित्याशंकानिरासायाहुः । आसक्तावपीति । पुष्टिमार्गीयस्य स्वमार्गीयभगवत्स्व

रूपातिरिक्तासक्तेरनुचितत्वात् एतस्य पूर्वजन्मनि संकर्षणस्वरूपासक्तत्वात् तस्य वसाक्षात् पु
रुषोत्तमत्वाभावात्तदासक्तिनिवृत्त्यर्थं शापं दापितवान् । अथवा अहंकारे सत्यपि क्षवित् लो
के भक्ताय शापं दापयति यथा परीक्षितिति । क्वचिदितिपदात् अहंकाराभावेपि क्षवित् शा
पो यस्यते यथेंद्रद्युम्ने अगस्त्यशापः । शापायोग्येष्वपि भगवद्भक्तेषु शापानि न्नोऽस्मन दर्श
नेन यत् शापदानं तद्भगवदिच्छैव न तु प्रकारांतरेणेति ज्ञापनाय भगवानेवे त्यत्र एवकारः राम
तत्र शापदाने हेतुमाहुः । तन्मार्गस्थापनाय हीति । यस्य यस्मिन्मार्गे अंगीकारस्तस्य शा
20 पानंतरतरमपि तन्मार्गांगीकारस्य नित्यत्वेन तन्मार्गएव स्थापनं न तु मार्गांतरसंबंधस्तद 20
र्थमित्यर्थः । नित्यपदार्थस्य परमात्मभावो युक्त इति ज्ञापनायोक्तं हीति ॥१८॥ अतः प

रं शापानंतरमपि मार्गांगीकारस्थितिरिति नित्यत्वज्ञापन प्रकारमाहुः । न ते पाषंडतां यांती
ति । यदि भगवदंगीकारस्य नित्यत्वं न स्यात्तदा तेषां भगवत्संबंधाभावात् पाषंडित्वमेव स्या
द्यदि तेषां भगवदंगीकारो न स्यात्तदा कल्माषपादवत् ब्रह्मद्रोहरूपं दुष्टकर्म्मावरणं स्यात् अ
त एवोक्तं न ते पाषंडतां यांतीति । ते पाखंडमार्गप्रविष्टा न भवंतीत्यर्थः । एवमेकं मार्गांगीकार
नित्यत्वज्ञापकलक्षणमुक्त्वान्यान्यपि लक्षणान्याहुः । शापस्य क्लेशहेतुत्वमाशंक्यांगीकार
नित्यत्वेन तदभावमाहुः । न वै रोगाद्युपद्रव इति । तेषां बाधाद्युपद्रवो न भवति । अत एव दृ
त्रस्य सर्वाभिभावकत्वं न तु केनाप्यभिभाव्यत्वं । लक्षणांतरमाहुः । महानुभावा इति । मह
नू अनुभावो येषां यद्यपि शापयुक्तास्तथापि ते महानुभावा एव । अत एव भगवन्मार्गीतत्व

दैर्म्महादेवैः शापदानानंतरं पार्वतीप्रति ये तेषामनुभाव उक्तः । दृष्टवत्यसि सुश्रोणि हरेरद्भु
तकर्म्मणः । माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनां । नारायणपरा लोके न कुतश्चन बि
भ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ ननु तेषां महानुभावत्वं तर्हि कथं शापसंभव
इत्यत आहुः । प्रायेणाशास्त्रं शब्दत्वहेतुवदिति । शिष्यते नेनेति व्युत्पत्त्या शास्त्रमिति शापस्य
शास्त्ररूपत्वात् पूर्वजन्मापराधनिवृत्तिः हेतुत्वमुक्तं । प्रायेणेति संभावना । एवं भगवदंगीका राम
रस्य नित्यत्वं मर्यादामार्गेपि ज्ञेयं । नित्यत्वज्ञापका धर्म्मा न तेषां खंडतां यांतीत्यादयो म
 र्यादामार्गेपि ज्ञेयाः परीक्षितिश्च गजेंद्रेवा ॥१८॥ ननु यदि शापानंतरमपि भगवदंगी
कारस्य नित्यत्वेनात्र घ्वपि पूर्वधर्म्मसमानत्वं तर्हि फलेपि साम्यं भविष्यतीतित्याशंका नि

राशयाहुः । भगवत्तारतम्येनेति । भगवत्स्वरूपानद्भजनप्रकारतारतम्येन फलेपि भक्तास्ता
रतम्यं भजंति हि । तत्र भजनतारतम्ये प्रकारः । पुष्टिमार्गभजने स्नेह एव नियामकः । मर्या
दामार्गीय भक्तभजने मर्यादामार्गीय भक्तस्य यद्यपि भजनीयः पुरुषोत्तम एव तथापि त
त्र विधिरेव नियामकः । ननु स्नेहोपीति तारतम्यं । इन्द्रद्युम्नस्य पूजापरत्वात्तत्र पूज्यस्य पुरु
षोत्तमविभूतिरूपत्वात् पूजायाः स्वकर्म्ममार्गत्वात्तत्रापि विधिरेव नियामक इति भगव
त्स्वरूपतद्भजनप्रकारतारतम्येन तारतम्यं भजंति । भजनतारतम्येन फलतारतम्यस्य युक्ति
त्वस्थापनाय हि राहुः । फलतारतम्यं प्रसिद्धमिति नात्र विचारः । ननु यदि तेषां केवलं भग
वत्परत्वमेव तर्हि श्रौतस्मार्त्तकर्म्माचरणे को हेतुरिति चेत्तत्राहुः । लोकिकत्वं वैदिकत्वमिति
त्व

यद्यपि ज्ञानमार्गीयस्यापि भक्तस्य तावत् कर्म्माणि कुर्व्वीत न निर्विद्येत यावता । मत्कथाश्र
वणादौ वा श्रद्धा यावन्न जायते इति अनेन श्रौतस्मार्तकर्म्माचरणस्यानावश्यकत्वं प्रतीयते
पुष्टिमार्गीयाणामपि यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न
पतेदिह इति वाक्यात् अत्र आस्थायेति आस्थानं च नाम कायवाङ्मनसां तदेकपरत्वं । तादृशाना राम
मपि श्रौतस्मार्त्तकर्म्माचरणानावश्यकत्वे पि यत् कर्म्माचरणं तत्र को हेतुरित्याशंक्याहुः । वैदि
कत्वं लौकिकत्वं कापट्यादिति । वैदिकत्वं वैदिककर्म्माचरणं लौकिकत्वं लौकिकव्यवहारा २२
२२ दिपरिपालनं तत्तेषु कापट्यात् कापट्याद्धेतोरित्यर्थः । कापट्यं नाम लोकसंग्रहः । अतएव भ
गवताप्युक्तं । सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत । कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लो

कसंग्रहं । न बुद्धिभेदं जनयेदज्ञानां कर्म्मसंगिनां । योजयेत् सर्व्वकर्म्माणि विद्वान्युक्तः समाच
रन्निति भगवद्वाक्यात् तन्मार्गीयपूर्णभक्तिमतां वैदिकलौकिककर्म्माचरणं लोकसंग्रहा
र्थमेव ॥२०॥ ननु कर्म्मासक्तानामिव परमपुरुषार्थरूपत्वे यद्यपि तेषां पूर्व्वोक्तकर्म्मकरणमना
सक्तिपूर्व्वकं लोकसंग्रहार्थमेवेत्युक्तं तर्हि तेषां कस्मिन् कर्म्मणि आसक्तिपूर्व्वकं करणमिति चे
त्तत्राहुः । वैष्णवत्वं हि सहजमिति । वैष्णवत्वं नाम पुष्टिमर्यादामार्गप्रवर्त्तकाचार्योपदेशपूर्व्वकं
तदुक्तप्रकारेण तन्मार्गानुवर्त्तित्वं । तदेव तेषां सहजो धर्म्मः स्वाभाविको धर्म्मः । सहजमिति
तेन तन्मार्गीयाणामेव धर्म्माणामासक्तिपूर्व्वकं करणं ततो न्यत्र ततः वैष्णवधर्म्मादिति रि
क्तधर्म्मेषु विपर्य्ययः पूर्व्वोक्तप्रकारः अनासक्तिपूर्व्वकं करणं लोकसंग्रहार्थं करणमित्यर्थः

एवं मार्गद्वयजीवानां फलपर्यवसानं तत्त्वं निरूप्य पुष्टिमर्यादामार्गांगीकाररहितानां देवजीवानां सा
धारणानां स्वरूपं कृतिं चाहुः ।संबंधिनस्त्विति। संबंधि देवत्वेन पुष्टिमर्यादामार्गांगीकृतजीवसंबं
धिनो न तु तन्मार्गप्रवृत्ताः ॥२१॥ तथा अपरे प्रवाहस्थाः। ते सर्व्वे वर्णाश्रमधर्माः सर्व्वमार्गेषु परिभ्रम
णशीलाः एवं सर्व्वे वर्त्मस्तु मार्गत्रयेष्वपि क्षणात् कालविशेषं प्राप्य सर्व्वे त्वं तत्तन्मार्गीयत्वं प्राप्नुवं
ति तत्तन्मार्गीयधर्मानुकरणं कुर्वंति। ते मार्गत्रयधर्मानुकरणमेव कुर्वंति। न तु तेषां कुत्रापि वि
२३ श्रुतिः। रुचिः क्वापि न भवतीत्यर्थः। न तु क्वापि [illegible] इत्यर्थः ॥ तेषां फलपर्यवसानमाहुः। राम
तेषां क्रियानुसारेणेति। तेषां तत्तन्मार्गीयकृत्याकरणेन सर्वत्र सकलं कामितं कामनाविष २३
यं फलं भवतीत्यर्थः। तेषां भगवदनंगीकृतानां साधारणानां कामासक्तत्वात् तत्क्रियानुसा

रेण सकलं तत्तत्कामितं फलं भवतीत्यर्थः। एवं संबंधिनां स्वरूपमुक्त्वा केवलप्रवाहस्थानां
स्वरूपमाहुः। प्रवाहस्थान् प्रवक्ष्यामीति। कथनप्रकारमाहुः। स्वरूपांगकृत्यायुतानिति ॥२३॥
तेषां स्वरूपमाहुः। जीवास्त इति। ते प्रवाहस्था जीवाः। आसुरा ते सर्व्वे भगवतेव प्रवृत्तिं च निवृ
त्तिं चेति वर्णिताः। आसुरेष्वपि प्रकारभेदमाहुः। ते च द्विविधेति। द्वैविध्यमेव प्रदर्शयंति
सुज्ञ दुर्ज्ञविभेदत इति। यथा देवजीवेष्वपि केचन। पंडिताः। केचन न। तद्वत् केचन आसुरे
षु दुर्ज्ञाः केचन अज्ञाः ॥२४॥ दुर्ज्ञानां लक्षणमाहुः। दुर्ज्ञास्त इति। प्रवृत्तिं च निवृत्तिं चेति भगवत्प्रो
क्तलक्षणा दुर्ज्ञाः [illegible] अज्ञानाहुः। तानन्विति। ये तान् अनुतदुक्तप्रकारानुवर्त्तिनस्ते अज्ञाः। न
न्वासुरेषु जीवेषु मूलादिषु कस्य वित्सभक्तगवत्परता दर्शने को हेतुरित्याशंकायामुच्यते।

वस्तुतस्तु स नैवासुरजीवः एवं आसुरजीवे भगवद्भावस्यासंभवात् । किंतु भगवदपराधाज्ज्ञाता
पराधाद्वा सोपि पुष्टिमार्गीयः प्रवाहे समागत्य प्रवाहस्थैः संगं प्राप्याऽपि तत्कुले जन्म वा प्राप्यापि
तैर्न पुष्यते आसुरभावैर्योगं न प्राप्नोति । ननु यदि स आसुरभावैर्न पुष्यते तर्हि तस्यासुरकुलोत्प
त्तौ को हेतुरिति चेत्तत्राहुः । कर्मणा जायते प्रेत इति । कर्मणा पूर्वं भगवदपराधरूपेण अथवा
तज्जनितप्रारब्धकर्मणा जन्मनः प्रारब्धकर्माधीनत्वात् । तत्रासुरकुले जन्मानंतरमपि न ज्ञा राम
तृसंबंधाभावः कथं संभवतीति चेत् उच्यते । तस्य पूर्वजन्मनि पुष्टिमार्गीयत्वेन भगवदंगीकृ २८
२८ तत्वात् भगवदंगीकारस्य नित्यत्वात् । अत एव गीतायां भगवताप्युक्तं स्वल्पमप्यस्य धर्म
स्य त्रायते महतो भयादिति तस्य पूर्वजन्मनि भगवद्धर्माचरणसंस्कारेऽवशिष्टत्वात् । आसुरकु
स्य

ले जन्मांतरमपि नाऽसुरभावप्रवेशः । किंच गीतायां अयतिः श्रद्धयोपेतो योगाच्चलितमान
सः इत्यारभ्य तदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते इत्यंतेन पार्थपृष्टेन भगवता पार्थ नैवेह
नामुत्र विनाशस्तस्य विद्यते । नहि कल्याणकृत कश्चिद्दुर्गतिं तात गच्छति । प्राप्य पुण्यकृतांल्लो
कानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । अथवा योगिनामेव कुले
भवति धीमतां । एतद्धि दुर्लभतरं लोके जन्म यदीदृशं । तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं
यतते च ततो भूयः संसिद्धौ कुरुनंदन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः । जिज्ञासुरपि
योगस्य परंब्रह्मातिवर्तते इत्यंतेन पार्थसंशयो निवारितः । यत्र योगभ्रष्टस्यापि पूर्वजन्म
योगधर्माचरणसंस्कारानिवृत्तिः । तत्र भगवदंगीकृतस्य पुष्टिमार्गीयस्य पूर्वजन्माचरित

त१

भगवद्धर्मस्य सर्वतोधिकप्राबल्यात् आसुरसंगेन तत्कुलजन्मनापि पूर्वजन्मसंस्कारनिवृ
त्त्यभावात् यावज्जीवं तत्संस्कारबलेन अंतकालेपि तत्संस्कारस्य विद्यमानत्वात् अंते या मतिः
सा गतिरिति शास्त्रात् । यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं । तं तमेवेति कौंतेय सदा
तद्भावभावित इति भगवद्वाक्याच्च तस्य भगवत्प्राप्तिरेव न तु आसुरत्वाबजनित: । कोप्यंत
राय इति सर्वमनवद्यं । एवमत्र ग्रंथोपसंहारदर्शनादग्रेपि ग्रंथोस्तीति ज्ञायते तथाप्य राम
ग्रिमग्रंथस्याप्रसिद्धत्वात् यावत्प्रसिद्ध एव व्याख्यात इति । न तु यपंक्तिः कावित् । श्रीमत्कृ
२५ ष्णस्य वागर्थो दुर्बोधः सर्वथा स्वतः । तत्कृपातस्तदीयस्य बुद्धिगम्यो न वान्यथा १ नत्वा २५
पितृपदांभोजं कृपया मधुसंपूरितं । तदालोडितबुद्ध्यैव श्रीमदाचार्यभावितं २ पुष्टि
भावा४

प्रवाहमर्यादाभेदकं शास्त्रमद्भुतं । श्रीवल्लभेन व्याख्यातं तत्कृपातो यथामति ३ तेनाचा
र्याः प्रसीदंतु मयि निःसाधने स्वतः । तेनैव मम नैश्चिंत्यमैहिके पारलौकिके ४ इति
श्रीश्रीमत्पितृचरणैकतान श्रीश्रीवल्लभविरचितं पुष्टिप्रवाहमर्यादाविवरणं संपूर्णं ॥ २६

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पुष्टिप्रवाहमर्यादाविरवनं॥